# ॥ श्री नृसिंहवराहस्तोत्रम् ॥

ओं ॥ प्रह्लादाह्लादहेतुं सकलगुणगणं सच्चिदानन्दमात्रं
सैंहासह्योग्रमूर्तिं सदभयमरिशण्खौ रमां बिभ्रतं च ।
अंहस्संहारदक्षं विधिभवविहगेन्द्रेन्द्रचन्द्रादिवन्द्यं
रक्षोवक्षोविदारोल्लसदमलदृशं नौमि लक्ष्मीनृसिंहम् ॥ १ ॥

वामांकस्थधराकरान्जलिपुटप्रेमातिहृष्टान्तरं
सीमातीतगुणं फणीन्द्रफणगश्रीमान्यपादाम्बुजम् ।
कामाद्याकरचक्रशण्खसुवरोद्दामाभयोद्यत्करं
सामादीड्यवराहरूपममलं हे मासने तं स्मर ॥ २ ॥

कोलाय लसदाकल्पजालाय वनमालिने ।
नीलाय निजभक्तौघपालाय हरये नमः ॥ ३ ॥

धात्रीं शुभगुणपात्रीमादायाशेषविबुधमोदाय ।
शेषे तमिममदोषे धातुं हातुं च शङ्किनं शङ्के ॥ ४ ॥

नमोस्तु हरये युक्तिगिरये निर्जितारये ।
समस्तगुरवे कल्पतरवे परवेदिनाम् ॥ ५ ॥

॥ इति श्रीमद्वादिराजपूज्यचरणविरचितं शीनृसिंहवराहस्तोत्रं संपूर्णम् ॥